Ref. No.: EX/CBCS/SAN/UG/CORE/2.1(OLD)/2025

BACHELOR OF ARTS EXAMINATION, 2025

(1st Year, 2nd Semester)

SANSKRIT (Honours)

Course: III

[Mahākāvya & Metrics]

Time: Two Hours | Full Marks: 30

The figures in the margin indicate full marks.

क–विभागः

१. किरातार्जुनीयमिति महाकाव्यस्य प्रथमसर्गे दुर्योधनस्य राज्यस्य श्रीवृद्धिविषये कविना यथोक्तं संक्षेपेण तन्निरूप्यताम् । 6

अथवा,

सुयोधनः कपटदूतक्रीडया जितं राज्यं नयेन जेतुं कथं चेष्टितवान् किरातार्जुनीयमिति महाकाव्यस्य प्रथमसर्गमवलम्ब्य स्पष्टीक्रियताम् । 6

२. अधोनिर्दिष्टयोरेकस्य सप्रसङ्गं तात्पर्यं देयम् – 3

क) हितं मनोहारि च दुर्लभं वचः ।

ख) समुन्नयन् भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभिः ।

३. अधोलिखितेषु प्रश्नद्वयं सुरगिरा देवनागर्या लिप्या च समाधेयम् – 3x2= 6

क) 'निहन्ति दण्डेन स धर्मविप्लवम्'--अत्र स–इत्यनेन कः सूचितः ?

स कस्मिन् विषये केन प्रकारेण च धर्मविप्लवं निहन्ति ? 0.5+0.5+2= 3

ख) 'विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्' - 'नक्तन्दिवमस्ततन्द्रिणा' इत्यत्र सन्धिविभागः कार्यः? तस्य पौरुषं कथं वितन्यते? संक्षेपेण लिख्यताम्। 1+2= 3

ग) 'न बाधतेऽस्य त्रिगणः परस्परम्'-अत्र त्रिगणः इति पदेन के सूच्यन्ते? त्रिगणः परस्परं कथं न बाधते इति संक्षेपेण उच्यताम् । 1+2= 3

ख–विभागः

४.कुमारसम्भव मिति महाकाव्यस्य पञ्चमसर्गे पार्वत्याः तपश्चर्यायाः वर्णनं यथोपस्थापितं कविना, तत्स्वकीयभाषया लिख्यताम् । 6

५. अधोनिर्दिष्टयोरेकस्याः पङ्क्तेः सप्रसङ्गं तात्पर्यं लिख्यताम् – 3

(क) न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ।

(ख) का ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत् ।

६. अधःप्रदत्तेषु चत्वार प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः– 1x4= 4

(क) पार्वती तपश्चर्यार्थं कुत्र गतवती?

(ख) तपसे गौरी किमाच्छादनं गृहीतवती?

(ग) तपोवनं पावनं बभूव–इत्यस्य एकां युक्तिः दीयताम्?

(घ) जटिलस्य वेशः कीदृश आसीत् ?

(ङ) पार्वत्याः अपर्णा इति नामकरणं किमर्थम्?

७. निम्नलिखितेषु चतुर्णां सुरगिरा पर्यायशब्दो देयः – 0.5x4= 2

(क) ग्लपयन्ती, (ख) प्रवेपमानम्, (ग) शुचौ, (घ) श्यामिकया, (ङ) सहस्यरात्रीः।

*****